श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचिता

# ॥ श्री लक्ष्मीनरसिंहपञ्चाशत् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनरसिंहपञ्चाशत् ॥

हयग्रीवकृपापात्रम् आत्रेयकुलभूषणम्।
सेवाख्यस्वामिनं सेवे बुधन्वपरदेशिकम्॥

नृसिंहसूरिमाचार्यं नृसिंहं परदैवतम्।
प्राप्यप्रापकभावेन प्रपद्ये परवानहम्॥

भक्तत्राणपरायणत्वमतुलं भक्तेषु सन्दर्शयन्
स्थूणाभेदनकर्मणापि घटयन् दिव्यां दयामर्भके।
व्याप्तिं च स्वयमेव साधुनिवहे सर्वत्र सन्नादयन्
देवः श्रीनृहरिर्मदीयहृदये जेजीयतां सन्ततम्॥ 1 ॥

वेदानामपि गोचरो न भगवान् वेदैर्हि वेद्यो हरिः
भेदेनासुरवेश्मनि प्रमुदितः स्तम्भस्य साक्षादभूत्।
दृष्ट्वा तृप्तिमवापुरद्भुतवपुः कोपेन सौम्यं क्षणात्
प्राप्तुं तं प्रयतस्व मानस मम प्रीत्या समीच्या सदा॥ 2 ॥

प्रह्लादः परभक्तियोगमहितः प्रह्लादयन् मानसं
सर्वेषूत्तमतामवाप्य नृहरिं साक्षाच्च कुर्वन् स्वयम्।
पूर्णस्सन् परमं प्रपद्य धरणावानन्दमत्युज्ज्वलं
त्वं चाश्वाश्रय तादृशं नरहरिं हे मानसाद्य स्थिरम्॥ 3 ॥

साधूनां परिरक्षणाय दुरितध्वंसाय सद्धर्मिणां
धर्मस्य स्थितये च जन्म लभते यद्यद्यदाऽपेक्षितम्।

---

*The printed source of this stotra (booklet published by Seva Trust, Chennai) contains numerous typographical errors. A best attempt has been made to correct them.*

सत्यं ज्ञानमनन्तमुज्ज्वलतरानन्दं सदा निर्मलम्
तद्ब्रह्म स्वयमुद्बभूव जगतां क्षेमाय सिंहाननम् ॥ 4 ॥

भृत्यं रक्षितुमुद्यतो बहुविधां रीतिं वरस्य स्मरन्
दिव्यं चापि सुदर्शनं पिहितवान् ब्रह्मोक्तिसंमाननः।
भक्तं भृत्यमनन्तशोभनगुणारामं किशोरं परं
गाढाश्लेषविधानसौभगमिदं सौदर्शनं ते वपुः ॥ 5 ॥

प्रह्लादावनसम्भृतेन वपुषा दिव्येन सेवां दिशन्
श्रीलक्ष्मीनरकेसरी वितनुतात् श्रेयांसि भूयांसि मे।
येन व्याप्तमिदं समस्तभुवनं यस्सन्निधत्ते सदा
तस्मादन्यमहो श्रयेय शरणं कं वा कथं वा मनः ॥ 6 ॥

वैकुण्ठे बहुशोभने मणिमयैस्तम्भैस्सहस्रैर्युते
सत्त्वोन्मेषसमिद्ध्यमानसुभगे पर्यंकवर्ये सदा।
राजद्भास्करकोटितुल्यरुचिना संकाशमानः प्रभुः
दुष्टे तामसदानवस्य सदने जातो हि मां रक्षितुम् ॥ 7 ॥

स्तम्भः किन्नु चकार भव्यसुकृतं यश्चेतनावञ्चितः
तिष्ठन्नेव समस्तलोकशरणं योऽसूत सिंहाननम्।
नायं दारुमयो न चोपलमयः स्तम्भो न वा मृन्मयः
नूनं श्रीनरसिंहजन्मनिलयो वैदूर्यवर्यात्मकः ॥ 8 ॥

जातः स्तम्भवरं बभञ्ज नृहरिश्चिच्छेद वक्षस्स्थलं
भक्तत्राणकृतक्षणस्य निखिलं क्रूरं त्विदं चेष्टितम्।
उत्संगे पितरं निधाय हृदयं निर्भिद्य पुत्रं परं
शान्तेन स्वयमालिलिङ्ग सुभगं वक्षःस्थलेनाद्भुतम् ॥ 9 ॥

प्रह्लादे नरतां निरीक्ष्य नरतां तत्याज नैव स्वयम्
तत्ताते मृगतामुदीक्ष्य मृगतामङ्गीचकारानने।
रूपव्याकरणं समस्तजगतां यत्कृत्यमाहुर्बुधाः
तद्रूपं न मृगस्य नैव मनुजस्येत्यद्भुतं दृश्यते॥ **10** ॥

नास्तीत्याह पिता तदस्ति भुवने सर्वत्र पुत्रोऽवदत्
स्याच्चेद्दृष्टिपथं न याति भगवान् पप्रच्छ कस्मादिति।
एतावद्भिरते हिरण्यकशिपौ नैव प्रभुस्सम्भवेत्
पुत्रं हन्तुमथोद्यतो दनुसुतस्तस्माद्धि जज्ञे हरिः॥ **11** ॥

सर्वव्याप्तिमुशन्ति दैवतवरे नारायणे पण्डिताः
सर्वान्तर्यमनेन तादृशमिति प्राज्ञा हि निश्चिन्वते।
स्थाणौ ज्ञानयुते तथैव हि जडे द्रव्ये च सत्तां हरेः
व्यक्तिं दर्शयति स्म साधु तनवै तस्मै नमस्या इमाः॥ **12** ॥

कोपः कश्चन धिक्करोति करुणा चोरीकरोतीतराम्
नेत्रं तामसरक्तमांसलमतो दिव्यारविन्दोज्ज्वलम्।
हस्तौ पाटनसंगिनौ पटुतरावाश्लेषसुव्यापृतौ
ताते तत्तनये विहारसरणिर्दिव्या नृसिंहस्य नः॥ **13** ॥

पुत्रं नाशयितुं यदा प्रववृते सन्तं स्वकं दैत्यराट्
धूर्तं तं निजघान दैवतवरः श्रीमान् नृसिंहो हरिः।
भेतव्यं न कदाऽपि साधुभिरिदं विश्वस्य तच्छासनं
स्थातव्यं परभक्तियोगभरितैः क्षेमाय योगाय च॥ **14** ॥

दिव्यं जन्म तथैव कर्म मनुजा जानीथ यूयं ममे-
त्याह श्रीयदुपुंगवः करुणया तत्सत्यमीक्षामहे।
स्थूणातः कथमुद्भवः दितिसुतध्वंसः कथं वा द्रुतं
सौम्यक्रौर्यसमन्वयः कथमिवैकस्मिन् क्षणे जायताम्॥ **15** ॥

स्तम्भं स्वेन विनिर्मितं मणिमयं निश्चित्य तेनोज्झितं
गर्वाच्छर्वपितामहादिविनुतं गूढं न वेत्तुं क्षमः।
धिक्कुर्वन् तनयं च भीषणवचोगुम्फैर्बलादर्दयन्
दुर्दर्शं हि ददर्श दिव्यपुरुषं यादृच्छिकं दैवतम्॥ **16** ॥

किन्ते सद्म हरे हिरण्यकशिपोः स्तम्भो न जानासि किं
भग्नः किं न पुनः सुराररपि तत्याज स्वयं जीवितम्।
तस्मात् पुण्यतमे वसामि सदने तस्यैव किं नोचितं
प्रह्लादः परमप्रियो हि वसति श्रेष्ठं ततः किं गृहम्॥ **17** ॥

विश्वं रक्षितुमुद्यतेन विधिना दत्ते वरे दानवः
विश्वं सत्त्वविवर्जितं विहितवान् धर्मं जघान स्वयम्।
धर्मो भागवतापराधनिचयो रूपं नृसिंहात्मना
धृत्वा तं निजघान भूरियशसे धर्माय तस्मै नमः॥ **18** ॥

दूरीकर्तुमना हिरण्यकशिपुं दूरीचकार श्रियं
सा त्वज्ञातविनिग्रहा सकरुणा गुप्त्यै कदाचित् भवेत्।
तन्नाम्न्येव हिरण्यमस्त्यभिमतिस्तस्या अपि स्यादिति
नूनं योगनृसिंहरूपमभजद्द्वन्द्वेऽद्भुतं दैवतम्॥ **19** ॥

वृत्तिं कल्पितवान् क्षणेन जगतां धर्मस्य चोन्मूलकं
हत्वा त्वं नृहरे नभश्चरगणान् भूयोऽपि सुस्थान् व्यधाः।
स्वं स्वं भागमवाप्य शोभनधियो भूयस्तरां खेचराः
निर्भीकास्सुखमाप्नुवन् मम विभो शान्तिं विधत्स्वादरात्॥ **20** ॥

वेधा निर्वृतिमाप पाकदमनो भूतिं परां योगिनः
सिद्धिं सत्तपसां प्रसूतिमभजन् पुष्टिं तपस्याधनाः।
सर्वे किम्पुरुषा महापुरुषतां विद्याश्च विद्याधराः
गन्धर्वाश्शुभगाननैपुणमहो किं किं न साध्यं हरे॥ **21** ॥

कोपश्शान्तिमयो रवः श्रुतिमयो देहोऽनुकम्पामयः
वीक्षा धर्ममयी मनः प्रियमयं श्रोत्रे विवित्सामये।
श्वासास्तोषमयाः करौ सुममयौ जिह्वा सुधामय्यपि
ज्ञानानन्दमयं भजामि नृहरिं रक्षामयं दैवतम्॥ **22**॥

येन त्वं सुरवैरिणं निहतवान् शिश्लेष येनार्भकं
येनैवाभयमाश्रितेषु निदधे दध्रे च येनाचलः।
पद्मं येन धृतं धृता च हरिणी पद्मा सुभूत्यै सतां
सोऽयं रक्षणदीक्षितस्तव करो मां रक्षतादन्वहम्॥ **23**॥

दुःखं दुर्धरमन्वभावि शिशुना भूयस्तरां दुर्वचं
तत्रोदासि कुतस्त्वदीयनिधने किं नानुतापस्तव।
स्वीयेनैव बलेन दानवसुतः संरक्षितश्चेद्वयं
कां शक्तिं परभक्तिरूपमहितां श्रद्ध्महे कथ्यताम्॥ **24**॥

सिंहस्त्वं गिरिकन्दरेषु वसतिं सम्प्राप्य संमोदसे
स्तम्भे तामससद्मनि स्थिरतरं स्थातुं कथं प्राभवः।
स्तम्भं तं तरसा प्रपीड्य दनुजप्राणांश्च कोलाहलात्
मोदं साधुजने तनोषि भगवन् संरक्ष मामर्भकम्॥ **25**॥

सिंहास्सन्ति वने गिरौ च गहने तुंगे स्वतन्वा मृगाः
गुल्मे शैलपदे जनिस्तु विदिता तेषां निसर्गोचिता।
जातस्त्वं नरकेसरी मणिमयस्तम्भाद्गृहेऽरेः प्रभो
सर्वेष्वेव ततोऽचलेषु ददृशे नारायणः केसरी॥ **26**॥

वैकुण्ठे प्रलये च नीरभरिते क्षीरोदधौ वा सतां
स्वान्ते पर्वतमूर्धसु श्रुतिगिरां चूडापदे भूतले।
सन्ध्यायां शरणागतार्तिदलने प्रह्लादनामोद्धृतौ
भक्तानां परितो विभासि भगवन् श्रीमन् नृसिंह प्रभो॥ **27**॥

एकं त्वं व्यहनो हिरण्यकशिपुं प्रह्लादहिंसोल्बणं
संख्यातुं च न पारयेर्मम कृते जानीहि न त्वं क्षमः।
तावन्तीह वसन्ति पुष्कलतया पापान्यसंख्यानि मे
प्राज्ञानां परिभावकानि भवतो भीषाकराण्यप्यहो॥ **28** ॥

दृष्टं नैव च विश्रुतं भगवतस्ते रूपमत्यद्भुतं
जाया ते निजगाद नैव निकटे याति स्म या भीतितः।
तद् भव्यं वपुरातनोतु जगतां भद्राणि नित्यानि नो
ब्रह्मेशानमुखैर्यदेव बहुधा संसेवितं शाश्वतम्॥ **29** ॥

पश्येमाद्भुतरूपमञ्जलिभरा जीवेम भूयस्तरां
नन्दामाद्भुतचेष्टितेन नृहरेर्मोदाम दिव्यास्समाः।
दासास्तस्य भवाम साधु शृणवामानन्दवृत्तादिकं
प्रब्रूमश्शरदः शतं भगवतोऽजीता वयं स्याम च॥ **30** ॥

दिव्यायाद्भुतकर्मणे दितिसुतध्वंसोद्यतायानिशं
भव्याय प्रियकारिणे भगवते शान्तोदितायात्मने।
वैकुण्ठाय नृसिंहरूपवहनायानन्दसन्दायिने
प्रह्लादप्रियसम्भवाय महसे तुभ्यं नमस्या इमाः॥ **31** ॥

स्तोत्रं तु क्रियते मया चपलतः किं तेन दुष्टोऽस्म्यहं
तुष्टश्चेत् कथमप्यनन्तविभवो धन्यो भवेयं ध्रुवम्।
ज्ञानं संकुचितं ममेति विदितं क्षोदक्षमं नेति चेत्
हन्ताहं परितोषमेमि भगवन् काचिन्न हानिर्मम॥ **32** ॥

बाह्याडम्बरलोकनेन बहवो भ्राम्यन्ति विज्ञानिनः
बाह्याडम्बरमप्यनन्तमहिम त्वं स्वीकरोषि ध्रुवम्।
तेनैवासुरनायकोऽपि निधनं सम्प्रापितस्तत्क्षणात्
हित्वाऽऽडम्बरजालमाशु नृहरे वात्सल्यतो रक्ष माम्॥ **33** ॥

क्वाहं मन्दमतिर्नृसिंहविभवः क्वेतीव चिन्ता न मे
    भीत्या चैव लिखामि नैव परितो वाचा स्पृशामीश्वरम्।
धूर्तत्वं मम जागरूकमनिशं स्यान्मूर्खता बालता
    रत्नेभ्योऽपि यथाऽऽदरो भवति तत्पेट्यां तथा मत्स्तुतौ॥ **34**॥

अस्माकं तु सुदर्शनं दितिसुतस्यादर्शनं तत्त्वतः
    प्रह्लादेन विशिष्टता नरहरेरेतद्धि सम्भिद्यते।
प्रायस्ते पुरतस्सुदर्शनमयं रूपं ततो दृश्यते
    तावत्कं महदुल्बणं कथमिव प्राप्यं रथाङ्गेन ते॥ **35**॥

किं ब्रूयां तव वैभवं नरहरे कां वा सपर्यां हितां
    कर्तुं सम्प्रति सर्वदैव सुभगां त्वत्तोषिणीं सन्मताम्।
सर्वत्र त्वमसीति रूपितमिदं तत्त्वं यदि स्वीकुरु
    प्रायः प्रेष्ठतमं तथाऽन्यदपि वा प्रीत्या कृतार्थं कुरु॥ **36**॥

वेदात्मन् नृहरे विभासि कतमं रूपं प्रपद्य श्रुतौ
    किं रूपं नमकस्य जातु चमकस्येत्येव संशीयते।
नेतिप्रत्ययवान् हिरण्यकशिपुर्भावेतरं भावयन्
    नास्तिप्रत्ययगोचरश्च चमकं त्वामाश्रये भूतये॥ **37**॥

स्तम्भोऽभिद्यत दानवस्य हृदयं तीक्ष्णैर्नखैरञ्जसा
    ब्रह्माद्वैतविदां विचारसरणिस्तूर्णं तु चूर्णीकृता।
ध्वस्ताहम्मतिराशु पामरजने नादेन निर्यापितो
    गर्वस्तेन विभेदयाद्य नृहरे मत्पापराशिं क्षणात्॥ **38**॥

माता त्वं नृहरिर्न चैव विदितो भेदः पुमान् स्त्रीति वा
    वक्षोभेदनकर्मणा दृढतया जाने पुमांसं परम्।
साक्षी तार्किककेसरी मम गुरुस्त्वामाह सिंहीं परां
    न स्त्री नैव पुमानिति प्रथयितुं स्याच्चेष्टितं तेऽद्भुतम्॥ **39**॥

माता त्वं नहि मेयतामुपगतः स्मृत्या हि मेयं जगुः
स्थूणा मानमभून्मितो हि भवनस्तम्भैकदेशो ध्रुवम्।
मातृत्वं व्यवृणोर्निजार्भककृते वात्सल्यसन्धुक्षितः
तत्तातस्य तु मापको भवसि चेत्क्लिष्टं समस्तं प्रभो॥ **40** ॥

प्राज्ञस्त्वां परिचिन्वते नरहरिं वैकुण्ठकण्ठीरवम्
मन्ये ते नरतां कदाचिदपि ते नेच्छन्त्यकस्मादपि।
वैकुण्ठो हरिरेव तस्य निलयो लोकोऽथ देशोऽपि वा
वैकुण्ठीयहरिर्भवेदपि कथं ज्ञातुं प्रगल्भा वयम्॥ **41** ॥

स्तम्भादुद्भव आशु नाशनमरेर्बालस्य संलालनं
योगः पङ्कजया विशिष्टहसनं चक्रादिभिर्दर्शनम्।
सद्गन्यध्वनि मानसे सुमनसां सद्वर्तनं सर्वदा
स्मर्तॄणां परमाद्भुतं च निखिलं वृत्तं नृसिंह प्रभो॥ **42** ॥

सन्ध्यां त्वां परिचिन्वते सुकृतिनः सन्ध्योदितं दैवतं
सन्धानं जगतां नृसिंहवपुषा सम्यक् त्वया सूचितम्।
सन्ध्या त्वं समभूर्हिरण्यकशिपोस्स्वायन्तनी तत्सुते
प्राची मद्विषये विभासि भगवन् माध्यन्दिनीति ध्रुवम्॥ **43** ॥

सिंहत्वं नरतोभयं त्वयि वयं प्रेक्षामहे भाग्यतः
कान्तारे नरगन्धमात्ररहिते शैले गुहाभिर्युते।
स्वैरं सञ्चरणं तव प्रियतमं जानामि सिंहोचितं
किं ते न स्वदते नरत्वसुभगं मच्चित्तसंशीलनम्॥ **44** ॥

दोषाणां निलयो हिरण्यकशिपुर्दोषान् गुणानां निधौ
दध्यौ स्वीयसुतेऽपि हन्त भवतीवात्यन्तहिंस्रोऽभवत्।
दोषं तं परिकल्प्य कारणतया जातः प्रदोषे स्वयं
दुष्टं ध्वंसितवान् तथैव वृजिनध्वंसं विधत्स्वाद्य मे॥ **45** ॥

रामे रञ्जितमानसे रतिकरे दिव्यात्मनामन्वहं
    साक्षान्मन्मथमन्मथे रसमये कृष्णे च दृग्गोचरे।
रूपं ते परमं सटादिसहितं सैंहं सदा भीषकं
    कस्माद्वीक्षितुमुत्सुकाः प्रतिदिनं जाने न ते वैभवम्॥ **46** ॥

सिंहस्त्वं नहि सेव्यसे वनचरैस्सिंहैस्तथाऽन्यैर्मृगैः
    त्वामत्यन्तविलक्षणं विसदृशं ज्ञात्वा द्रवन्त्येव ते।
सेवन्ते मुनयस्तथैव यतयो ज्ञात्वा परं पूरुषं
    तस्मादादरमातनोषि नृहरे सर्वावने साम्प्रतम्॥ **47** ॥

चिन्तातीतविभूतिकस्य भवतस्तत्त्वं महान्तो जगुः
    चिन्त्यं साधु विचित्ररूपगुणकर्माद्यैर्वरिष्ठैरपि।
निश्चिन्ता इह सञ्चरेम बहुधा संसेवमानाः प्रभो
    त्वामत्यद्भुतमूर्तिभिर्नवनवाभिर्भ्राजमानं गिरौ॥ **48** ॥

प्राह्लादी परमा न चास्ति भगवन् भक्तिस्त्वयि स्थेयसी
    प्राज्ञानामनुवर्तनं च नहि मे सम्पद्यतां किं नु मे।
देवी सा करुणा न चास्ति यदि ते का वा गतिस्सम्भवेत्
    मामारादव मन्दमप्यतितरां श्रीमन्नृसिंहार्भकम्॥ **49** ॥

स्तोतुं न प्रभवामि मन्दधिषणो जानामि चैतद्ध्रुवम्
    नुन्नः सार्थकतां करोमि वचसां द्वित्राक्षराम्रेडनात्।
वाचा त्वं परितुष्यसीति विदितं मज्जल्पनं स्वीकुरु
    श्रेयस्सन्ततिमादरेण पठतामेतं स्तवं श्रीहरे॥ **50** ॥

आत्रेयः कविवादिसिंहगुरुराड्देवारतो भूतये
    भक्त्या श्रीनिधिराघवस्सुमनसां सेवात्मिकामातनोत्।
मालोलो मधुसूदनो मधुमयी माता तया भार्गवी
    मान्यो वेदशिरो गुरुश्च मुदिताः प्रीता भवन्त्वन्वहम्॥ **51** ॥

॥ इति श्री लक्ष्मीनरसिंहपञ्चाशत् समाप्ता ॥